ग्रामजालम्। इति त्रिकाण्डशेषः॥ तगरपुष्पम्। इति राजनिर्घण्टः॥ व्यूहविशेषः। (एतस्य लक्षणं यथा,—
"अष्टारं वर्त्तुलाकारं व्यूहचक्रं त्रिनाडिकम्।
दण्डचतुष्टयं बाह्ये कर्णेषु च चतुर्द्दिशम्॥
पूर्व्वदण्डाग्रतोऽन्यस्य दिनभाद्यं भमण्डलम्।
प्रवेशे निर्गमे चैव त्रीणि त्रीणि प्रदक्षिणे॥
शशिसंज्ञाष्टकं मध्ये तद्बाह्ये भानुसंज्ञकम्।
तृतीयं राहुसंज्ञञ्च केतुर्दण्डचतुष्टये॥
चन्द्रर्क्षे विजयो लाभः सूर्य्यर्क्षे मध्यमं फलम्।
राहुधिष्ण्याष्टके विघ्नं मृत्युः केतुचतुष्टये॥
एवमुक्तं चतुःस्थाने यद्दिने यस्य नामभम्।
तद्दिने तत् फलं तस्य सर्व्वकार्य्येषु सर्व्वदा॥"
एतच्चक्रन्तु भगवता द्रोणाचार्य्येण अभिमन्युवधायैवाभिकल्पितम्। तत्र व्यूहमध्ये निर्म्माणप्रकाश्य कः कुत्र आसीदिति प्रदर्शयितुमाह।
"चक्रव्यूहो महाराज! आचार्य्येणाभिकल्पितः।
तत्र शक्रोपमाः सर्व्वे राजानो विनिवेशिताः॥
अवस्थानेषु विन्यस्ताः कुमाराः सूर्य्यवर्च्चसः।
संघातो राजपुत्राणां सर्व्वेषामभवत्तदा॥
कृताभिसमयाः सर्व्वे सुवर्णविकृतध्वजाः।
रक्ताम्बरधराः सर्व्वे सर्व्वे रक्तविभूषणाः॥
सर्व्वे रक्तपताकाश्च सर्व्वे वै हेममालिनः।
चन्दनागुरुदिग्धाङ्गाः स्रग्विणः सूक्ष्मवाससः॥
सहिताः पर्य्यधावन्त कार्ष्णिं प्रति युयुत्सवः।
तेषां दशसहस्राणि बभूवुर्दृढधन्विनाम्॥
पौत्रं तव पुरस्कृत्य लक्ष्मणं प्रियदर्शनम्।
अन्योन्यसमदुःखास्ते अन्योन्यसमसाहसाः॥
अन्योन्यं स्पर्द्धमानाश्चाप्यन्योन्यस्य हिते रताः॥
दुर्य्योधनस्तु राजेन्द्र! सैन्यमध्ये व्यवस्थितः।
कर्णदुःशासनकृपैर्वृतो राजा महारथैः॥
देवराजोपमः श्रीमान् श्वेतच्छत्राभिसंवृतः।
चामरव्यजनाक्षेपैरुदयन्निव भास्करः॥
प्रमुखे तस्य सैन्यस्य द्रोणोऽवस्थितनायकः।
सिन्धुराजस्तथाऽतिष्ठत् श्रीमान् मेरुरिवाचलः॥
सिन्धुराजस्य पार्श्वस्था अश्वत्थामपुरोगमाः।
सुतास्तव महाराज! त्रिंशत्त्रिदशसन्निभाः॥
गान्धारराजः कितवः शल्यो भूरिश्रवास्तथा।
पार्श्वतः सिन्धुराजस्य व्यराजन्त महारथाः॥
ततः प्रववृते युद्धं तुमुलं लोमहर्षणम्।
तावकानां परेषाञ्च मृत्युं कृत्वा निवर्त्तनम्॥"
इति महाभारते। ७। ३३। १३—२४॥)
तैलयन्त्रम्। इत्यमरटीकायां स्वामी॥ (यथा, आर्य्यासप्तशत्याम्। ५६२।
"कैरमयान् पीडयतः किं चक्रेणापि तैल-[कारस्य॥"
कालज्ञापकयन्त्रविशेषः। यथा, गोलाध्याये।
"चक्रं चक्रांशाङ्कं परिधौ सूत्रस्य जलादिकाधारम्।
धात्री त्रिभ आशारात् कल्प्या भार्द्धेऽत्र खार्द्धञ्च॥
तन्मध्ये सूक्ष्माक्षं क्षिप्तार्काभिमुखनेमिकं धार्य्यम्।
भूमेश्छन्नभागास्तत्र दिनं तत्रोन्नता भुक्ताः॥ [म्।
तत्रूपाहारिणैवं नता उन्नतनवद्युक्षोत्र्त्रु ...द्युदलोन्नतांशभक्तं भाग्यः स्थूलाः परैः प्रोक्ताः॥"
धातुमयं दारुमयं वा समं चक्रं कृत्वा तन्नेम्यां जलादिराधारः शिथिलः कार्य्यः। चक्रमध्ये सूक्ष्मं सुषिरमाधारात् सुषिरोपगामिनी लम्बवदूर्द्ध्वरेखा कार्य्या। तन्मध्यतोऽन्या तिर्य्यक्रेखा चात्र कार्य्या। तच्चक्रं परिधौ भगणांशैरङ्कयित्वाधारात् त्रिभ इति नवतिभागान्तरे तिर्य्यग्रेखा तत्परिधिसम्पाते धात्री क्षितिः कल्प्या। भार्द्धेऽन्तर ऊर्द्ध्वरेखानेमिसम्पाते खार्द्धं कल्प्यम्। सुषिरे सूक्ष्मा शलाका प्रदातव्या। सा चाक्षसंज्ञा। तच्चक्रमर्काभिमुखनेमिकञ्च यथा भवति तथाधारे धार्य्यम्। तथा कृतेऽक्षस्य छाया परिधौ यत्र लगति तत्कुजचिह्नयोरन्तरे ये अंशास्ते रवेरुन्नतांशाः। ये छायाखार्द्धयोरन्तरे ते नतांशा ज्ञेयाः। एवमत्र नतोन्नतांशज्ञानमेव भवति। अतोऽन्यैर्घटिका अप्यानीताः। तद्यथा, तस्मिन् दिने गणितेन मध्यन्दिनोन्नतांशान् दिनार्द्धमानञ्च ज्ञात्वानुपातः कृतः। यदि मध्यन्दिनोन्नतांशैर्दिनार्द्धनाड्यो लभ्यन्ते तदैभिः किमित्येवं स्थूला घटिकाः स्युः॥ अथ वेधेन ग्रहज्ञानमाह।
"चैत्रर्क्षपुष्याश्विमवारुणाना-
न्तद्द्वयं नेमिगतं यथा स्यात्।
दूरेऽन्तरेऽल्पेषु भखेचरौ वा
तथात्र यन्त्रं सुधिया प्रधार्य्यम्॥
नेमिस्थदृष्ट्याच्युगतं प्रपश्येत्
खेटञ्च धिष्ण्यस्य च योगतारम्।
नेम्यङ्कयोरच्युतयोस्तु मध्ये
येंऽशाःस्थिता भध्रुवको युतस्तैः॥
प्रत्यक्स्थिते भेऽथ पुरःस्थिते तै-
र्हीनो ध्रुवः स्यात् खचरस्य भुक्तम्॥"
तत्र यन्त्रस्याधो नेम्यां दृष्टिं कृत्वोर्द्ध्वनेम्यासक्तयोर्मध्ये भद्वितयं युगपन्नेमिगतं यथा स्यात् तथा यन्त्रं स्थिरं कृत्वा नेम्यां धिष्ण्ययोरेकतरं स्थानमङ्कयेत्। ततोऽग्रे पृष्ठतो वा दृष्टिं चालयित्वा ग्रहं विध्येत्। ग्रहः प्रायोऽच्युगतो दृश्यते। अथ मण्डलस्य ग्रहस्य चान्तरं शरो ग्रहावधिः अथ मण्डलं नेम्यां यत्र लग्नं दृश्यते तत् स्थानमप्यङ्कम्। अथ भग्रहाङ्कयोर्मध्ये येंऽशास्तैर्भध्रुवो युतः स्फुटग्रहो भवति यदा ग्रहात् पश्चिमस्थं नक्षत्रम्। यदा पूर्व्वस्थं नक्षत्रं तदा भध्रुवो हीनः स्फुटग्रहो भवति। अथवाल्पशरं नक्षत्रं रोहिण्याद्यं ततो दूरेऽन्तरे यदा ग्रहस्तदा तावेव विद्ध्वा प्रोक्तवद्ग्रहज्ञानम्। इति चक्रयन्त्रम्॥ शरीरस्थषट्चक्राणि यथा। मूलाधारः १ स्वाधिष्ठानम् २ मणिपूरम् ३ अनाहतम् ४ विशुद्धम् ५ आज्ञाख्यम् ६। तद्यथा,—
"मूलाधारे त्रिकोणाख्ये इच्छाज्ञानक्रियात्मके।
मध्ये स्वयम्भुलिङ्गन्तु कोटिसूर्य्यसमप्रभम्॥
तदूर्द्ध्वे कामबीजन्तु कलशान्तीन्दुनादकम्।
तदूर्द्ध्वे तु शिखाकारा कुण्डली ब्रह्मविग्रहा॥
तद्बाह्ये हेमवर्णाभं वसवर्णचतुर्द्दलम्।
द्रुतहेमसमप्रख्यं पद्मं तत्र विभावयेत्॥
तदूर्द्ध्वेऽग्निसमप्रख्यं षड्दलं हीरकप्रभम्।
वादिलान्तषड्वर्णेन युक्ताधिष्ठानसंज्ञकम्॥
मूलमाधारषट्कानां मूलाधारं ततो विदुः।
स्वशब्देन परं लिङ्गं स्वाधिष्ठानं ततो विदुः॥
तदूर्द्ध्वे नाभिदेशे तु मणिपूरं महाप्रभम्।
मेघाभं विद्युदाभञ्च बहुतेजोमयं ततः॥
मणिवद्भिन्नतत्पद्मं मणिपूरं तथोच्यते।
दशभिश्च दलैर्युक्तं डादिफान्ताक्षरान्वितम्॥
शिवेनाधिष्ठितं पद्मं विश्वालोकैककारणम्।
तदूर्द्ध्वेऽनाहतं पद्ममुद्यदादित्यसन्निभम्॥
कादिठान्ताक्षरैरर्कपत्रैश्च समधिष्ठितम्।
तन्मध्ये बाणलिङ्गन्तु सूर्य्यायुतसमप्रभम्॥
शब्दब्रह्ममयं शब्दोऽनाहतस्तत्र दृश्यते।
तेनाहताख्यं पद्मं तन्मुनिभिः परिकीर्त्तितम्॥
आनन्दसदनं तत्तु पुरुषाधिष्ठितं परम्।
तदूर्द्ध्वन्तु विशुद्धाख्यं दलषोडशपङ्कजम्॥
स्वरैः षोडशकैर्युक्तं धूम्रवर्णं महाप्रभम्।
विशुद्धिं तनुते यस्मात् जीवस्य हंसलोकनात्॥
विशुद्धं पद्ममाख्यातमाकाशाख्यं महाद्भुतम्।
आज्ञाचक्रं तदूर्द्ध्वे तु आत्मनाधिष्ठितं परम्॥
आज्ञासंक्रमणं तत्र गुरोराज्ञेति कीर्त्तितम्।
कैलासाख्यं तदूर्द्ध्वे तु बोधनीन्तु तदूर्द्ध्वतः॥
एवञ्च शिवचक्राणि प्रोक्तानि तव सुव्रत!॥"*॥
मन्त्रोद्धारार्थंषट्चक्राणि यथा। कुलाकुलचक्रम् १ राशिचक्रम् २ नक्षत्रचक्रम् ३ अकथहचक्रम् ४ अकडमचक्रम् ५ ऋणिधनिचक्रम् ६। तद्यथा,—
"कुलाकुलस्य भेदं हि वक्ष्यामि मन्त्रिणामिह।
वाय्वग्निभूजलाकाशाः पञ्चाशल्लिपयः क्रमात्॥
पञ्चह्रस्वाः पञ्चदीर्घा बिन्द्वन्ताः सन्धिसम्भवाः।
कादयः पञ्चशः य र ल व हान्ताः प्रकीर्त्तिताः॥
तथा च।
अ आ ए क च ट त प य षाः मारुताः।
इ ई ऐ ख छ ठ थ फ र क्षाः आग्नेयाः।
उ ऊ ओ ग ज ड द ब लाः पार्थिवाः।
ऋ ॠ औ घ झ ढ ध भ व साः वारुणाः।
ऌ ॡ अं ङ ञ ण न म श हाः नाभसाः॥
साधकस्याक्षरं पूर्व्वं मन्त्रस्यापि तदक्षरम्।
यद्येकभूतदैवत्यं जानीयात् सकुलं हि तत्॥
भौमस्य वारुणं मित्रमाग्नेयस्यापि मारुतम्।
मारुतं पार्थिवानाञ्च शत्रुराग्नेयमम्भसाम्॥
नाभसं सर्व्वमित्रं स्याद्विरुद्धं नैव शीलयेत्॥"
अथ राशिचक्रम्।
"रेखाद्वयं पूर्व्वपरागतं स्यात्
तन्मध्यतो याम्यकुवेरभेदात्।
एकैकमीशानशिखाचरे तु
हुताशवाय्वोर्विलिखेत्ततोऽर्व्वाक्॥
वेदाग्निवह्नियुगलप्रवणाग्निसंस्थान्
पञ्चेषुबाणशरपञ्चचतुष्टयांशान्।
मेषादितः प्रविलिखेत् सकलांस्तु वर्णान्
कन्यायतांश्च प्रविलिखेदथ शादिवर्णान्॥